CCE-III-RR/PR/PF/NSR/NSPR(A)/111/7109

**A**

**ಆಗಸ್ಟ್ 2024 ರ ಪರೀಕ್ಷೆ-3**

**AUGUST 2024 EXAMINATION-3**

ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12 ]
Total No. of Printed Pages : 12 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 45 ]
Total No. of Questions : 45 ]

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 16-S**
**Code No. : 16-S**

**CCE RR/PR/PF/ NSR/NSPR**
**FULL SYLLABUS**

Question Paper Serial No.

# ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ

# Subject : First Language — SANSKRIT

# प्रथमभाषा — संस्कृतम्

**(ಶಾಲಾ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / ಎನ್.ಎಸ್.ಆರ್. / ಎನ್.ಎಸ್.ಪಿ.ಆರ್.)**

**(Regular Repeater / Private Repeater / Private Fresh / NSR / NSPR)**

ದಿನಾಂಕ : 02. 08. 2024 ] [ Date : 02. 08. 2024
ಸಮಯ : ಬೆಳಗ್ಗೆ 10-15 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-30 ರವರೆಗೆ ] [ Time : 10-15 A.M. to 1-30 P.M.
ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

**Cut here/ಇಲ್ಲಿ ಕತ್ತರಿಸಿ**

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ಒಟ್ಟು 45 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ***ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ (ಬಾಣವನ್ನು ಅನುಸರಿಸಿ), ಎಡಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಬೇಡಿ.*** ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ನೀಡಲಾಗಿದೆ.
6. ನಿಮಗೆ ವಿತರಿಸಲಾಗಿರುವ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಆವೃತ್ತಿ ( Version ) ಮತ್ತು ನಿಮ್ಮ ಪ್ರವೇಶ ಪತ್ರದಲ್ಲಿ ಮುದ್ರಿತವಾಗಿರುವ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಆವೃತ್ತಿ ಒಂದೇ ಆಗಿರುವುದನ್ನು ಖಾತರಿಪಡಿಸಿಕೊಳ್ಳಿ.

***परीक्षार्थिनां सामान्यसूचनाः***

1. अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । **परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन** कर्तयत **(तीर निशानं अनुसराणि)** । **प्रश्नपत्रमुद्घाटयितुं वामपार्श्वेन मा कर्तयत ।** प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां अधिकृताः अङ्काः दक्षिणपार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । तत्र पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।
6. भवद्भ्यः प्रदत्ता प्रश्नपत्रस्य आवृत्तिः ( Version ) तथा भवतां प्रवेशपत्रे मुद्रित–प्रश्नपत्रस्य आवृत्तिः च समाना वा इति पर्यवलोकयत ।

02. 08. 2024

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुमितः कर्तयत

इतः कर्तयत

Tear here

**I.** **अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6 × 1 = 6**

1. 'भुजङ्गः' अस्य समानार्थकपदम् इदं भवति ।

   (A) दर्पः (B) सर्पः

   (C) कन्दर्पः (D) सुदर्पः

2. 'स्मृतः' अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) अस्मृतः (B) नस्मृतः

   (C) स्मृतिः (D) विस्मृतः

3. 'नायकः' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

   (A) नायिका (B) नायकी

   (C) नायकि (D) नायिके

4. 'अवर्णयत्' अत्र एषः लकारः वर्तते ।

   (A) लट् (B) लङ्

   (C) लिट् (D) लोट्

5. 'अहम्' अत्र एषा विभक्तिः वर्तते ।

(A) प्रथमाविभक्तिः (B) द्वितीयाविभक्तिः

(C) पञ्चमीविभक्तिः (D) तृतीयाविभक्तिः

6. वृत्रासुरः जनान् पीडयति स्म । अत्र रेखाङ्कितपदस्य प्रश्नवाचकपदम् इदं भवति ।

(A) कः (B) केन

(C) कदा (D) कस्मै

**II. चतुर्थं पदं लिखत ।** **4 × 1 = 4**

7. कस्यस्विद्धनम् – मा गृधः :: इदं जगत् – .................... ।

8. वृत्रासुरः – राक्षसः :: दधीचिः – .................... ।

9. मोघल्चक्रवर्ती – औरङ्गजेबः :: केळदीसाम्राज्ञी – .................... ।

10. गणपतिः – मुनिः :: रमणः – .................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **7 × 1 = 7**

11. सरस्वती नद्याः तीरे कस्य आश्रमः आसीत् ?

12. कः भूमिं परितः प्रदक्षिणं करोति ?

13. बाल्ये शास्त्रिमहोदयस्य गृहपरिसरः कथम् आसीत् ?

14. इदं सर्वं केन वास्यम् ?

15. पाण्डवेषु कः राजपदवीम् अलभत ?

16. दुःखितः ध्रुवः कस्याः समीपम् अगच्छत् ?

17. रमणमहर्षेः कस्मिन् विषये अनास्था आसीत् ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

18. डा० सत्यव्रतशास्त्रिमहोदयेन प्राप्ताः देशीयाः प्रशस्तयः का ?

19. भोजस्य जन्मपत्रिकां दृष्ट्वा दैवज्ञः किमाह ?

20. कविः कीदृशीं मातरं नमामि इति वदति ।

21. हिमलिङ्गं कदा दर्शनयोग्यं भवति ? कौ अमरत्वं प्राप्तवन्तौ ?

**V. सूचनानुसारम् उत्तरं लिखत।** **4 × 2 = 8**

22. सन्धिं विभज्य नाम लिखत ।

a) मुनिरिति ।

b) अस्मन्मित्रम् ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) प्रतिवर्षम् ।

b) नीलकण्ठः ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

a) ग्रहस्य समीपम् =

b) प्राप्तम् उदकं यं सः =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

a) बालकः पाठं पठितवान् ।

b) छात्रः अध्येतुं शालां गच्छति ।

25. प्रयोगपरिवर्तनं कुरुत ।

a) बालकः पाठं पठति ।

b) मया जलं पीयते ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

26. ಮೈಸೂರು ನಗರವು ಸಾಂಸ್ಕೃತಿಕ ನಗರವೆಂದು ಪ್ರಸಿದ್ಧವಾಗಿದೆ. ಇಲ್ಲಿ ಪ್ರತಿವರ್ಷ ವಿಶ್ವವಿಖ್ಯಾತ ದಸರಾ ಮಹೋತ್ಸವವು ನಡೆಯುತ್ತದೆ.

Mysore city is famous as a cultural city. Every year the world famous Dussehra festival is takes place.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

27. पर्वतराजहिमालयः भारतस्य उत्तरभागे विराजते । अस्य प्राकृतिकसौन्दर्यं रमणीयं वर्तते ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **4 × 3 = 12**

28. ''किं भवेत् मम समीपे'' ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

29. ''लीलावती इति ग्रन्थे बहवः विषयाः निरूपिताः खलु ?''

कः पाठः ? का वदति ? कस्य ग्रन्थः एषः ?

30. ''किन्तु भवन्तं परिश्रान्तं पश्यामि'' ।

कः पाठः ? का अवदत् ? अत्र परिश्रान्तः कः ?

31. ''जग्राह सहसा रविम्'' ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

**IX. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 × 3 = 6**

32. डा० के०एस्० नागराजन् ।

33. भासः ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3 × 3 = 9**

34. यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।

सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।।

35. आत्मशक्तिवर्धिता विशालदृष्टिसंयुता

द्वेषभाववर्जिता निरन्तरं सुखप्रदा ।

राष्ट्रसत्वधारिणी तमः प्रखण्डखण्डिनी

भारतीयभावना विवृद्धिमेतुभारते ।।

36. ऐरावतं ततो दृष्ट्वा महत्तदिदमित्यपि ।

फलं मत्वा हस्तिराजमभिदुद्राव मारुतिः ।।

**अथवा**

आङ्गिको वाचिकश्चैव आहार्यः सात्विकस्तथा ।

चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः ।।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं समन्वयत ।** **1 × 3 = 3**

37. कमलमिव चारु वदनम् ।

**अथवा**

इन्दुः इन्दुरिव श्रीमान् ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

38. पुराणमित्येव न साधु सर्वम् ।

**XIII. पद्यं पूरयत ।** **1 × 4 = 4**

39. क्षारं जलं ..........................................................................

.......................................................................... ।

..........................................................................

.......................................................................... समुद्गिरन्ति ।।

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।**

**3 × 4 = 12**

40. किमर्थं मुञ्जः भोजं मारयितुं प्रयतते ?

**अथवा**

डा० सत्यव्रतशास्त्रिमहोदयस्य बाल्यजीवनं विवृणुत ।

41. पद्यभागे निरूपितान् नाट्यांशान् सङ्गृह्य लिखत ।

42. पद्यानुगुणम् आरोग्यनियमान् सङ्गृह्य लिखत ।

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** 1 × 4 = 4

43. एकदा राजकुमारः सिद्धार्थः विहारार्थम् उपवनं गतः । सहसा क्रन्दन-ध्वनिं श्रुत्वा सः इतस्ततः अपश्यत् । बाणेन विद्धः एकः हंसः भूमौ पतितः आसीत् । एतद् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम् । सः धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के आधारयत् । अत्रान्तरे देवदत्तः धावन् तत्र प्राप्तः । सिद्धार्थस्य हस्ते हंसं दृष्ट्वा सः उच्चैः अवदत् ''सिद्धार्थ ! एषः मम हंसः । मया बाणेन निपातितः । अतः मह्यं देहि'' सिद्धार्थः दृढ़तया अवदत् ''अहम् अस्य रक्षकः अस्मि'' । तदा तौ विवादं कुर्वन्तौ राजसभां गतौ । राजा सर्वं वृत्तान्तम् आकर्ण्य आदिशत् -''यस्य पार्श्वे हंसः आगमिष्यति तस्यैव भविष्यति'' इति । हंसः सिद्धार्थस्य समीपं गतवान् । सत्यमिदम् - 'भक्षकात् रक्षकः श्रेयान्' ।

**प्रश्नाः**

i) कः भूमौ पतितः आसीत् ?

ii) हंसः कस्य समीपं गतवान् ?

iii) सिद्धार्थस्य चित्तं किं जातम् ?

iv) हंसस्य रक्षकः कः ?

**XVI. पत्रं लिखत ।** 1 × 5 = 5

44. रामनगरमण्डलस्य सर्वकारीयप्रौढशालायाः छात्र/छात्रा इति मत्वा देवताकार्यनिमित्तं दिनद्वयस्य विरामं सम्प्रार्थ्य कक्ष्याध्यापकं प्रति पत्रं लिखत ।

**अथवा**

प्रवासार्थं धनं प्रेषयितुं पितरं/मातरं प्रति पत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** 1 × 5 = 5

45. परिसरस्य संरक्षणम् ।

**अथवा**

स्वातन्त्र्योत्सवः ।

DO NOT WRITE ANYTHING HERE